| JAIN COLLEGE V V Puram<br>1st PUC MOCK Paper – Jan. 2024 | **Course:** 1st year PUC<br>**Subject:** Sanskrit<br>**Max. Marks:** 80<br>**Duration:** 3:15 hour |
|---|---|

## Part - A

**I. अधोनिर्दिष्टानां प्रश्नानां उत्तराणि कोष्ठकात् उद्धृत्य लिखत ।** 10×1=10

1. विश्वं कस्मात् सम्भवति ?

   ( आकाशात्, अक्षरात्, स्वर्गात् )

2. वासवः केषां राजा ?

   ( असुराणां, मनुष्याणां, देवानां )

3. शीघ्रकः कः ?

   ( वायसः, मार्जारः, शशकः )

4. भीमसेनः केन सह तुल्यः ?

   ( हनूमतः, रामेण, लक्ष्मणेन )

5. वृद्धश्रवः कः ?

   ( कुबेरः, रामः, इन्द्रः )

6. मेना कस्य पत्नी ?

   ( कृष्णस्य, हिमालयस्य, शिवस्य )

7. पथिकस्य नामधेयं किम् ?

   ( गुरुमूर्तिः, गुरुश्रेयसः, गुरुनायकः )

8. सुपर्णः कः ?

   ( कालियः, गरुडः, कृष्णः )

9. केषां मनः निश्चलम् ?

   ( धीराणां, मुनिवराणां, दरिद्राणां )

10. सेनजिद्राजस्य सचिवस्य नाम किम् ?

   ( धर्मव्रतः, देवव्रतः, सत्यव्रतः)

**II. मञ्जूषातः सूक्त पदं चित्वा रिक्तस्थानं पूरयत ।** 5×1=5

11. परोपकारः पुण्याय ________ परपीडनम् ।
12. रूपमप्रतिमं वीर ! _________ निरीक्षितुम् ।

13. दशरथः ________ कुशिकसुतमनोरथमेव पूरयामास ।

14. मेघे स्थितः _________ इवावभाति ।

15. अन्नदाने ________ अस्ति ।

| |
|---|
| पुण्यम्, पापाय, शक्र, तदिच्छामि, सुतप्रदानेन |

**III. 16. संयोजयत ।** **5×1=5**

| <u>अ</u> | <u>आ</u> |
|---|---|
| अगस्त्यः | बलरामः |
| अङ्गिरसः | कुम्भसम्भवः |
| संकर्षणः | चेन्नमल्लिकार्जुनः |
| जलनिधिः | महर्षिः |
| अक्कमहादेवी | सागरः |

## <u>Part – B</u>

**IV. द्वित्रैः वाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया उत्तरं लिखत ।(चतुर्णामेव)** **4×2=8**

17. अपरायां विद्यायां के अन्तर्भवन्ति ?

18. 'विवादः विनाशाय' इति पाठस्य शीर्षिकां समर्थयत ।

19. हनूमान् स्वपरिचयं कथं करोति ?

20. विश्वामित्रस्य विज्ञापनं तथा दशरथस्य निर्णयः ?

21. पुत्र्याः विवाहविषये पर्वतराजस्य निर्णयः कः ?

21. सुभाषित्तोक्तरीत्या लोकस्थितिः कीदृशी ?

22. देवव्रत-चन्द्रधरयोः मैत्रीं वर्णयत ।

**V. पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत । (चतुर्णामेव)** **4×2=8**

23. यद्भूतयोनिं परिपश्यन्ति धीराः ।

24. अहिंसैव धर्ममार्गः ।

25. बलेन तपसा लब्धे बलेत्यतिबलेति च ।

26. मम नाम कथं जानासि ?

27. अहो, बिभेमि भर्तः बिभेमि ।

28. मित्रमेकमेव भवति प्रधानं जगतीतले ।

## Part – C

**VI. पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नडभाषाया / आङ्ग्लभाषया वा लिखत ।(चतुर्णामेव) 2×3=6**

29. मृदुश्च स्थिरचित्तश्च सदा भव्योऽनसूयकः ।

प्रियवादी च भूतानां सत्यवादी च राघवः ॥

30. उत्तिष्ठ देहि मे मार्गं पश्य वा मेऽद्य पौरुषम् ।

मच्छासनमकुर्वाणं त्वां वा नेष्ये यमक्षयम् ॥

31. एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।

लीलाकमलपत्राणि गणयामास पार्वती ॥

32. गिरिर्महान् गिरेरब्धिः महानब्धेर्नभो महत् ।

नभसोऽपि महत् ब्रह्म ततोऽप्याशा गरीयसी ॥

**VII. दशवाक्यैः संस्कृतभाषया आङ्ग्लभाषया वा उत्तरं लिखत । (चतुर्णामेव) 4×5=20**

33. श्रीरामस्य गुणान् सङ्गृह्य लिखत ।

34. हनूमता कृता भीमसत्वपरीक्षा ।

35. ताटकावधसन्दर्भे श्रीरामस्य सन्देहः कः ? सः कथं निवारितः ?

36. ज्योतिषिकस्य पूर्वजीवनवृत्तान्तः ।

37. कालियः ।

38. 'श्री' महोदयस्य आदर्शमयं जीवनम् ।

39. भारतदेशे विज्ञानस्य प्रगतिम् अधिकृत्य लघु प्रबन्धं लिखत ।

## Part – D

**VIII. एतेषाम् उपप्रश्नानां उत्तराणि संस्कृतभाषया लिखत । (पञ्चानामेव) 5×2=10**

**40. सन्धिं विभजत । (द्वयोः)**

( यथोर्णनाभिः, कस्त्वम्, येनात्र )

**41.सन्धिं योजयत । (द्वयोः)**

( चलति + एव, ईषत् + अकम्पत, मम + अपि )

**42. विग्रहवाक्यं लिखत । (द्वयोः)**

( गौर्गर्दभौ, कार्यक्षेत्रम्, महावीर्यः )

**43. समस्तपदं लिखत । (द्वयोः)**

(भूतानां योनिः, स्थिरं चित्तम् यस्य सः, महान् च असौ कपिः च )

**44. पदपरिचयम् कुरुत । (द्वयोः)**

(विज्ञाय, इति, प्रवेष्टुम् )

**45. समानार्थकं पदं लिखत । (द्वयोः)**

( सुपर्णः, वृक्षः, वायसः )

**46. विरुद्धार्थकपदं लिखत । (द्वयोः)**

( उत्तमम्, सितम्, मित्रम् )

**IX.47. संस्कृतभाषया अनुवदत ।** **4×1=4**

i. ನಾವು ಇತರರ ಸೇವೆಗಾಗಿ ಬದುಕಬೇಕು.

We Should live to serve others.

ii. ನಾಳೆ ನನ್ನ ತಂದೆಯು ನಗರಕ್ಕೆ ಬರುವರು.

My father is coming to the city tomorrow.

iii. ನೀನು ಏನು ಮಾಡುತ್ತಿರುವೆ ?

What are you doing ?

iv. ಭಾರತವು ವಿಶ್ವಶಾಂತಿಗಾಗಿ ಪ್ರಯತ್ನಿಸುತ್ತದೆ

India vows global peace.

**X.48. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** **4×1=4**

एकदा सगरो नाम नृपतिः आसीत् । अश्वमेधयज्ञं कर्तुमिच्छन् सः यज्ञाश्वं निष्कासितवान् । समाचारमेनं ज्ञात्वा इन्द्रः सगरस्य यज्ञाश्वं अपहृत्य रहसि तं पाताललोकं नीत्वा कपिलमहर्षेः आश्रमे तस्य निगूहनं कृतवान् । सगरपुत्राः यज्ञाश्वं सर्वत्र अन्विष्टवन्तः । यदा ते कुत्रापि अश्वं न दृष्टाः तदा ते भूमिं खनित्वा पातालमगच्छन् । तत्र कपिलमहर्षेः आश्रमे चरन्तं अश्वं ते अपश्यन् । कपिलमहर्षिरेव चोरः इति मत्वा तम् अदण्डयन् । यदा महर्षिः क्रोधात् अक्षिणी उद्घाट्य तान् दृष्टवान् तदा ते भस्मसादभूवुः ।

i. सगरः किमर्थं यज्ञाश्वं निष्कासितवान् ?

ii. कः यज्ञाश्वम् अपहरति ?

iii. सगरपुत्राः कुत्र यज्ञाश्वम् अपश्यन् ?

iv. सगरपुत्राः कम् अदण्डयन् ?

**********